1643

क्रं. ९२

४८।०या ४७

संस्कृत

त्रिभाष्यरत्ने प्रातिशाख्यविवरणं

आथर्वणिकं

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(1)

अथत्रिनाथरत्नप्रारंभः

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

॥१॥ श्रीगणेशाय नमः ॥ श्रीगुरुभ्यो नमः ॥ भक्तियुक्तः प्रणम्याहं गणेशाचरणद्वयं ॥ गुरूनपि गिरां देवीमिदं वक्ष्यामि लक्षणं ॥१॥
व्याख्यातं प्रातिशाख्यस्य वीक्ष्य वाररुचादिकं ॥ कृतं त्रिभाष्यरत्नं यद्भासते भूसुरप्रियं ॥२॥ श्लोकयोरनयोरयमर्थः ॥
भक्तियुक्तोहं गणेशपदद्वयं गुरूनीरमपि गिरां देवीं वाग्देवीमित्यर्थः ॥ तां च प्रणम्य लक्षणमिदं वक्ष्यामि ॥ यल्लक्षणं
(2) त्रिभाष्यरत्न नामकं भूसुरप्रियं विद्वत्प्रियं मद्भासते ॥ कीदृशं लक्षणं प्रातिशाख्यस्य व्याख्यानरूपं ॥ वाररुचादिकं
भाष्यजातं वीक्ष्य न्यूनातिरेकपरिहारेण कृतं विरचितं ॥ आदिशब्देन आत्रेयमाहिषेयौ गृह्येते ॥ अत एव त्रिभाष्य
रत्नमिति नाम्नोपपत्तिः ॥ त्रयाणां भाष्याणां समाहारस्त्रिभाष्यं तस्य रत्नं भूषणं ॥ अथ वर्णसमाम्नायः ॥ मंगला
नंतरारंभप्रश्नकार्येष्वथो अथेति ॥ मंगलाद्यनेकार्थकत्वादथशब्दस्यार्थनिर्णयार्थमेकोर्थो निश्चेतव्यः ॥ अत्रप्र
थमं तावन्मंगलार्थमुच्यते तस्य प्रमाणसाधर्म्यात् ॥ तथा च समाचक्षते शिक्षाकाराः ॥ ओंकारश्चाथशब्दश्च द्वा ॥१॥
वेतौ ब्रह्मणः पुरा ॥ कंठं भित्वा विनिर्यातौ तेन मांगलिकावुभाविति ॥ आहोस्विदानंतर्यार्थता वेदाध्ययनानंतरं लक्ष
णज्ञानं कुर्यादिति सापेक्षत्वाल्लक्षणस्य पूर्ववेदाधिगमे सति लक्षणपरीक्षावसरः ॥ अथवा अधिकारार्थो अथशब्दः ।

(2A)

त्वंथैवेतिविनिवर्तकाधिकारकावधारकाइतिविद्यमानत्वात्॥ अथ।वर्ण।सं।आ।म्नायः।पाठक्रमोधिक्रियइतें
तिसञ्ज्ञान्वयः।समित्येकीभावे आङितिमार्यादायांम्नायइत्यानुपूर्वेणएकीभूताअकारादयोवर्णास्वरभक्तिपर्या
वसानाःआनुपूर्वेणपूर्वैःशिष्टैरुपदिष्टाःतथाहि अ१आ२आ३इ१ई२ई३उ१उ२ऊ३ऋ१ॠ२ऌ१ए१ऐ२ओ१
ओ३इतिस्वराःषोडश।कखगघङ।चछजझञ।टठडढण।तथदधन।पफबभम।इतिस्पर्शाःपंचविंशतिः।यरल
वइतिचतस्रोंतस्थाः।ं कशषसःपहइतिषडूष्माणः।अनुस्वारस्वरभक्त्योश्चेतिसूत्रेणानुस्वारउक्तः।कालविशे
षाश्रयत्वादसोधर्मीनत्वनुनासिकधर्मः।विधर्मधर्मिणोर्नानासिक्योनविरोधःसंभवेत्स्मृतेः।तस्मात्करोतिकार्याणिव
र्णानांधर्मएवत्विति शिक्षाकारवचनंतुधर्मधर्मिणोरभेदविवक्षयोपपद्यते॥अथविसर्जनीयइत्यनेनविसर्जनी
यउक्तः।एकस्वरात्परोळोढमितिळकारउक्तः।स्पर्शादनुत्तमादितिचत्वारोयमाउक्ताः।रेफोष्मसंयोगेरेफस्वरभ
क्तिरितिस्वरभक्तिरुक्ता।अनेनक्रमेणयाजुर्वेदिकवर्णानांषष्ठिसंख्यानियम्यते।सूत्रएवविस्पष्टोद्रष्टव्यः।ननुत्रि
षष्टिश्चतुःषष्टिर्वावर्णाःशंभुमतेमताइतिशिक्षाकारवचनेसतिकथंषष्ठिसंख्यानियम्यते।सत्यंतल्लौकिकवैदिकसर्व

वर्णविषयमितिन शिक्षावचनेन विरोधः॥ अत्र सूत्रैरेतावतामेवोपलंभादेषनिर्णयो निर्णीतः॥ वर्णानां समाम्नायो वर्ण
॥२॥ समाम्नायः॥ अथ नवादितः समानाक्षराणि॥ अथेति संज्ञाधिकारार्थः॥ अस्मिन्वर्णसमाम्नाये आदित आरभ्य न
व वर्णाः समानाक्षरसंज्ञा भवंति॥ यथा। अ १ आ २ आ ३ इत्यादि। संज्ञायाः प्रयोजनं। दीर्घं समानाक्षरे सवर्णपर इत्यादि
(3) नन्वीदृशी महती संज्ञा किमर्था शिक्षादिशास्त्रप्रसिद्ध्यनुरोधायेति ब्रूमः॥ द्वेद्वे सवर्णे ह्रस्वदीर्घे। तेषु समानाक्षरेषु
द्वेद्वे ह्रस्वे द्वे द्वे दीर्घे वा ह्रस्वदीर्घे दीर्घह्रस्वे वा अक्षरं परस्परं सवर्णसंज्ञे भवतः॥ इयमन्वर्थसंज्ञा। सवर्णत्वं नाम सादृश्य
त्वमुच्यते॥ तस्मादकारादीनामिकारादिभिर्न सवर्णसंज्ञा [illegible] भिन्नस्थानप्रयत्नत्वादनयोः॥ संज्ञायाः प्रयोजनं दी
र्घं समानाक्षरे सवर्णपर इत्यादि॥ न प्लुतपूर्वं॥ प्लुतपूर्वं समानाक्षरं सवर्णसंज्ञं न भवति। प्लुतमस्मात्पूर्वमिति प्लुत
पूर्वं। यथा। अग्ना ३ इत्याहेत्यत्र दीर्घं समानाक्षरे सवर्णपर इत्येकादेशः प्रसक्तः तच्चानिष्टं॥ प्रतिषिद्धायां त्वेवं सवर्ण ॥२॥
संज्ञायां पारिशेष्यादिवर्णोकारौ यवकारावितिपूर्वस्य इकारस्य यत्वं। तत्र यकारो लुप्यते तत्र वर्णपूर्वौ यवकारावि ति
लुप्यते। यकारे लुप्ते सति इवर्णपर एकारमित्येकादेशः प्रसक्तः सोपि निषिध्यते। न प्लुत प्रग्रहावित्यनेन तस्मा

(3A)

दग्नाऽइत्याहेतिसिध्यति॥ षोडशादितःस्वराः॥ वर्णसमाम्नायस्यादितआरभ्यषोडशवर्णाःस्वरसंज्ञाभवंति आकारा
दयऔकारपर्यंताःसंज्ञायाःप्रयोजनं॥ अथस्वरपरोयकारमित्यादि॥ शेषोव्यंजनानि। स्वरेभ्यःशेषोवर्णराशिर्व्यंज
नसंज्ञाभवंति॥ ककारादिस्वरभक्तिपर्यंताःसंज्ञायाःप्रयोजनं।स्वरपूर्वंव्यंजनमित्यादि॥ आद्याःपंचविंशतिःस्पर्शाः।
व्यंजनेष्वाद्याःपंचविंशतिर्वर्णाःस्पर्शसंज्ञाभवंति।ककारादयोमकारपर्यंताः। संज्ञायाःप्रयोजनं।स्पर्शस्पर्शपरइत्या
दि। अथनवादितःसमानाक्षराणिषोडशादितस्वरइतितत्रोक्तं। अत्रापिआदितइतिवक्तव्येआद्याइतिशब्दांतर
प्रयोगोर्थांतरसूचकः। व्यंजनेष्वाद्यानतुस्वरेष्वाद्याइतिविज्ञेयं। परान्तस्थांतस्थाः॥ स्पर्शेभ्यःपरेचत्वारोवर्णाःअंत
स्थसंज्ञाभवंति॥ संज्ञायाःप्रयोजनं॥ अंतस्थापरश्चसवर्णमनुनासिकमित्यादि।परेषडूष्माणः॥ अंतस्थाभ्यःप
रेषडूर्णाऊष्मसंज्ञाभवंति। संज्ञायाःप्रयोजनंऊष्मास्वरपरइत्यादि॥ स्पर्शानामानुपूर्व्येणपंचपंचवर्गाः॥ स्पर्शानां
मध्येआनुपूर्व्येणपंचपंचवर्णावर्गसंज्ञाभवंति।कचटतपादयोङञणनमांताः। संज्ञायाःप्रयोजनंटवर्गश्चतवर्गप
रइत्यादि।प्रथमद्वितीयतृतीयचतुर्थोत्तमाः। एकैकस्मिन्वर्गेयथाक्रमेणवर्णाःप्रथमद्वितीयतृतीयचतुर्थोत्त

मसंज्ञाभवंति।सिद्धेपिसंख्यानिमित्तेनाम्निसंख्यांतराभिधानार्थंसंज्ञांतरंकथयितुंप्रथमादिसंज्ञाविधानं।तत्कथंक
॥२॥ कारादीनामेवंप्रथमादिसंज्ञाप्रत्ययापी।स्वरांतस्योष्मप्रभृतिषुतुसंख्यासंज्ञाप्रतिषेधार्था।संज्ञायाःप्रयोजनंप्रथ
मऊष्मपरोद्वितीयंतृतीयंस्वरघोषवत्परःहकारोहश्चतुर्थेपुनानुत्तमउत्तमपरः॥ऊष्मविसर्जनीयप्रथमद्वितीया
(५) अघोषाः॥ऊष्माणश्चविसर्जनीयश्चप्रथमद्वितीयाश्चाघोषसंज्ञाभवंति।संज्ञायाःप्रयोजनंअघोषपरस्तस्ये
त्यादि॥नहकारः॥नभवत्यघोषसंज्ञोहकारःऊष्मत्वादघोषत्वेप्राप्तेतदपवादोयं॥व्यंजनशेषोघोषवान्॥अघो
षेभ्योन्योव्यंजनशेषोघोषवत्संज्ञोभवति।यद्यप्यूष्मविसर्जनीयेत्यघोषेषूक्तेषुव्यंजनशेषस्यपारिशेष्याद्घोष
वत्त्वंसिद्धं।यथादेवदत्तयज्ञदत्तयोरपश्चुर्देवदत्तइत्युक्तेपरःपश्चुमानितिसिद्धं।तथापिशास्त्रेसंव्यवहारार्थं
संज्ञानिर्देशःक्रियतेपारिशेष्यादपिकंठोक्तेर्विशेषात्।अन्यथानहकारइतिहकारस्याघोषसंज्ञानिषि ॥३॥
ध्यते।नापिहकारोघोषवान्विध्यभावात्तथैवव्यंजनशेषस्वराअपितथानघोषवंतोनाप्यघोषाः।तथासति
घोषवत्परश्चेतियत्रयत्रवक्ष्यतितत्रतत्रसंदेहस्यात्।घोषवत्परोनामकिंपरइतितन्माभूदितिइदंसूत्रमा

(4A)

रभ्यते। व्यंजनरूपः शेषो व्यंजनशेषः अत्रसत्रे चोद्यपरिहाररूप एषविशेषो माहिषेयभाषितः। संज्ञायाः प्रयोजनं
घोषवत्परश्चेत्यादि॥ आप्रावोपाभ्यधिप्रतिपरिविनीत्युपसर्गाः॥ आ। प्र। अव। उप। अभि। अधि। प्रति। परि। वि। नि। इत्ये
ते शब्दा उपसर्गसंज्ञा भवंति। ननु प्रपरापसमन्ववनिर्दुर्व्याङित्यादिपाणिनीयाविशेषेण भणंति। कथमत्र सूत्रकृतानि
रर्गलमुपसर्गाः इतिशब्देन संकुचिताः। उच्यंते। यजुर्वेदविषयाएतावंत एवेति मंतव्यं। तर्हि प्रपरापसमितिसमुच्चये विशे
षः कथमुपलभ्यते इतिपरविधाने तस्यतात्पर्यं न तूपसर्गसंज्ञाविधाने विशेषपाठात्। तस्मान्नकेनचिद्विरोधः। संज्ञायाः
प्रयोजनं उपसर्गपाथ इत्यादि। इतिशब्दः प्रकारवाची॥ वर्णः कारोत्तरो वर्णाख्या॥ कारोत्तरो वर्णो वर्णस्याख्या भवति।
यथा। अथैकारेकारो। कारशब्द उत्तरो यस्मादसौ कारोत्तरः॥ अकारव्यवेतो व्यंजनानां॥ अकारव्यवहितो वर्णः का
रशब्दोत्तरो व्यंजनानामाख्या भवति। यथा। तकारश्च कार इत्यादि। अकारेण व्यवेतः अकारव्यवेतः। न विसर्जनी
यजिह्वामूलीयोपध्मानीयानुस्वारनासिक्यानां॥ विसर्जनीयादीनां वर्णत्वाविशेषात्कारोत्तरत्वे प्राप्त मनेन निवर्त्य
ते। न खलु विसर्जनीयादीनां कारोत्तरता भवति। कुतः सर्वत्र तथा प्रयोगानुपलंभात्। ननु यथा वर्णः कारोत्तरो वर्णाख्ये

प्रि.र.
निवर्णशब्दवाच्यस्यैवकारोत्तरत्वंनकारोणकारमित्यादिनतुवाचकस्य। अन्यथावर्णःकारइतिस्यात्। तद्वद्विसर्जनीयादी
॥४॥ नामित्यत्रापिवाच्यग्रहणमेवयुक्तंनान्यथातथासतिवाचकपरतयावारुत्वादिविरचितमुदाहरणमवसानेरविसर्जनी
येत्याद्यनुचितमितिचेत्रमैवंमंस्थाः॥वाच्यानांकेवलानामप्रयोगादत्रवाच्यवाचकयोरभेदविवक्षयासूत्रसरणीत्युदा
(5) हरणगमनिका॥एफस्तुरस्य॥रस्यतुएफशब्दआख्याभवति। तथारेफोष्मपरइति। रेफस्यव्यंजनत्वाविशेषात्संकारो
त्तरत्वमकारव्यवेतत्वंचतदुभयंतुशब्दोनिवारयति। अन्येत्वन्यथामन्यंते। अकारव्यवेतत्वमेवेतितदसाधु। तथासति
कदाचित्कारोत्तरताकदाचिद्रेफोत्तरताचेतिविकल्पःस्यात्। यथा अकारोव्यंजनानामितिविधानाद्विकल्पः। तथा
रेफोष्मसंयोगेरषःपूर्वोहवनीत्यादि॥नन्वेवंकारोत्तरत्वमपिविकल्पेनस्वीकृतंकुतश्चित्तस्मादस्मदुक्तएवयुक्तस्तु
शब्दार्थः। ह्रस्वोवर्णोत्तरस्त्रयाणां। वर्णोत्तरोह्रस्वस्त्रयाणांवर्णानांह्रस्वदीर्घप्लुतानांमाख्याभवति। यथाइवर्ण ॥८॥
परएकारं। वर्णशब्दउत्तरोयस्मात्सोवर्णोत्तरः॥अकारोव्यंजनानां॥व्यंजनानांमकारआख्याभवति। शच्छपर
इत्यादि। कारशब्दोत्तरत्वमिदंचविकल्प्यते। समुच्चयेत्वकारव्यवेतोव्यंजनानामितिव्यर्थंस्यात्। ननुतर्हिकारोत्तर

(5A)

र

ताक्रिमर्थात्तदानीमपिस्वच्यवायरूपेण अकारलाभात्।सएवआख्याभवतु।सत्यं।शिक्षादिशास्त्रप्रसिद्धसंकेतानु
सारेणेतिपरिहारः।अपरेतुसंगिरंते।अकारःसर्वस्वरांतस्यव्यंजनस्यचग्राहकइति।यथामनःक्षेमे।घा॰ना।घनःक्षोभ
णः।उक्थशासःक्षामेत्यादि।नक्षपरइतिनिषेधस्योदाहरणांस्यादिति।तदसाधु।कुतः।घाघाषपूर्वस्तनष्णमितिषपूर्वत्वात्।
नकारस्यटत्वेकृतेइष्टेद्धेतिस्यात्तथानिष्टं।किंचयत्रनहपरस्वरपरंघ्वित्यत्रस्वरपरशब्दोव्यर्थस्यात्।भवन्मतेसर्वस्व
रांतस्यस्वीकारनियमात्।तदस्मिन्नुपपन्नमेवतन्मतंमन्महे।किंतुवर्णमात्रस्याख्या।।ग्रहणस्यच।लक्ष्यनिमित्तं
चग्रहणमित्युच्यते।गृह्यतइतिग्रहणंगृह्यतेनेति।निमित्तमपिग्रहणंपदैकदेशः।प्रातिपदिकमितियावत्।चका
क रःपूर्वसूत्रोक्तमकारमाकर्षति।प्रातिपदिकस्यसर्वावस्थस्यअकारआख्याभवति।यथाकिंशिलकिंशिलेतिपरकिं
शिलशब्दोलक्ष्यंउदाहरणं।किंशिलश्चतुर्थोवन्यः।किंशिलायच।ओष्ठेवःपरोलुप्यतइतितुनिमित्तं।यथा।।
खाहोष्ठाभ्यां।उपयाममधरेणोष्ठेन।।अःकारआगमविकारिलोपिनां।आगमादीनामःकारआख्योभवति।अः
कारइतिप्रथमाविभक्तेरुपलक्षणं।आगमस्ययथा।द्वितीयचतुर्थयोस्तुव्यंजनोत्तरयोःपूर्वः।विकारिणोयथा।

॥५॥ अथनकारेणकारं।लोपिनोयथा। ईमंद्रासुप्रयसः।तिष्ठंत्येकयासपूर्वः इत्येकवचनानि।लपरोलकारमितिद्विवच
नं।आनुपूर्व्यान्नासिक्याइति बहुवचनं।आगमश्च विकारीच लोपीच आगमविकारिलोपिनः तेषां।ग्रहणंवा॥
(6) तेषामागमादीनांक्वचिद्ग्रहणंवाभवति।अः कारेणविनापीतितात्पर्यं आगमस्यतुयथा।आदिरंःहतिः इत्यादि।
विकारिणोयथा। हन्यादुप्यमानं च।लोपिनोयथा।एषसस्यइत्यादि।आसन्नःसंदेहे।संदेहेसतिआसन्नंपदं
वर्णंवाग्रह्णीयात्।स्वयमातृण्णांचविकर्णीचोत्तमेइत्यत्रचकारद्वयसंभवात्ग्रहनिमित्तत्वेनकथमेकोपाद
नमितिसंदेहेयदासन्नंकार्यभाजस्तदेवस्वीकर्तव्यंचोत्तमइतिसूत्रे।वर्णस्ययथा।आप्छषतीआकृतीइत्यादि।
अनेकस्यापि।संदेहेअनेकस्यपदस्यवर्णस्यवाग्रहणंभवति।अपिशब्दःसंदेहइत्यन्वादिशतियथा।तिष्ठं
त्येकयासपूर्वः।एवोत्तरइत्यादि॥प्रथमोवर्गोत्तरोवर्गाख्या॥वर्गशब्दोत्तरःप्रथमःस्ववर्गस्याख्याभवति। ॥५॥
यथाटवर्गश्चतवर्गपरः।वर्गशब्दोत्तरोयस्मादसौवर्गोत्तरः।अंविकारस्य॥अमितिशब्दोविकारस्याख्याभ
वति।अमितिद्वितीयाविभक्तेरुपलक्षणं।यथाप्रथमपूर्वोहकारश्चतुर्थंअथनकारेणकारं।पूर्वइतिपूर्वः॥

यःपूर्वशब्देनविशिष्यतेसतत्रैवस्वेनरूपेणोपलक्षितोज्ञातव्यः॥नतुरूपसामान्यादन्योभिन्नदेशस्थः॥यथा॥या
वापृथिवीपूर्वश्चप्रग्रहोभवतीतिवक्ष्यतिपूर्वत्वात्॥यावतीद्यावापृथिवीमहित्वेतियावतीशब्दःप्रग्रहः॥यावती
(6A) वैपृथिवीतुनस्यात्प्रग्रहः॥परइत्युत्तरः॥यःपरइत्यनेनविशिष्यतेसोपितत्रैवस्वेनरूपेणप्रत्येतव्यः॥यथाद्वे
त परश्चप्रग्रहोभवतीतिवक्ष्यतिपरत्वाद्द्विजायेविदइत्यत्रजायेशब्दःप्रग्रहः॥योनिरस्तिजायएहीत्यत्रतुनप्र
ग्रहः॥ऋकारऌकारौह्रस्वौ॥ऋकारश्चऌकारश्चह्रस्वसंज्ञौभवतः॥यथा॥ऋतवोवै॥अकॢप्तस्यकॢप्त्यै॥अ
कारश्च॥अकारश्चह्रस्वसंज्ञोभवति।चकारोह्रस्वत्वमन्वादिशति।यथा।अयंपुरइति।तेनचसमानका
लस्वरः॥तेनाकारेणयस्तुल्यकालस्वरःसचह्रस्वोभवति।अत्रापिचकारोह्रस्वान्वादेशकः॥समानकाल
स्वरइतिइकारश्चउकारश्चेत्यर्थः॥संध्यक्षराणांसमानकालत्वाभावात्।यथा।इषेत्वा।उपप्रयंतः।अत्राह।
अकारोह्रस्वस्तेनचसमानकालस्वरःइत्यारब्धव्यं।ऋकारऌकारौह्रस्वावितितन्नारब्धव्यं।एवमारभ्य
माणेपुनरुक्ततयागौरवंभवेदिति।उच्यते।आरब्धमेवेतत्।कुतः।ऋकारऌकारयोरंतरेरेफलकारोस्तः

त्रि·प्रा·

॥५॥ तस्थानत्वादनयोःलकारव्यभिचारस्यात्।ह्रस्वत्वंनगम्येत।तन्माभूदित्येवमारभ्यते।ऋकारऌकारौह्रस्वाविति॥
अनुस्वारश्च॥भवत्यनुस्वारोपिह्रस्वसंज्ञः।यथा।तांह्रस्वे।चकारोह्रस्वान्वादेशकः॥अनुस्वारस्वरभक्तिश्चे
(७) तिस्वरंप्रत्यंगविधानादनुस्वारस्यव्यंजनत्वं।तथासतिह्रस्वार्धकालव्यंजनमितिअर्धमात्रत्वेप्राप्तेतन्माभू
दितिह्रस्वत्वंविधीयते।ह्रस्वसंज्ञायाःप्रयोजनंअथादावुत्तरविभागेह्रस्वव्यंजनपरइति॥द्विस्तावान्दीर्घः॥
तावानितिप्रकृते।ह्रस्वउच्यतेद्विरितिद्विरूपः।तावान्ह्रस्वोदीर्घसंज्ञोभवतीतिसूत्रयोजना।तात्पर्यंतुह्रस्व
द्विगुणकालःस्वरोदीर्घसंज्ञोभवतीति।संज्ञायाःप्रयोजनंदीर्घंसमानाक्षरेसवर्णपरइति॥त्रिःप्लुतः॥अ
त्रापिह्रस्वोनुवर्त्ततेसांनिध्यात्त्रिरितित्रिरूपोह्रस्वःप्लुतसंज्ञोभवतितात्पर्यंतत्रापिक्रमः।ह्रस्वत्रिगुणका
लस्वरःप्लुतसंज्ञोभवति·संज्ञायाःप्रयोजनंनप्लुतप्रग्रहाविति॥ह्रस्वार्धकालंव्यंजनं॥व्यंजनंह्रस्वार्धका ॥६॥
लंभवति।यथावाक्।ह्रस्वस्यार्धंह्रस्वार्धंह्रस्वार्धंपरिमाणकालोयस्यतत्तथोक्तं॥उच्चैरुदात्तः॥आयामो
दारुण्यमितिलक्षणलक्षितस्वरउदात्तउच्यते।यथासंतेसंज्ञायाःप्रयोजनं।उदात्तात्परोनुदात्तःस्वरितमिति॥

(७अ)

नीचैरनुदात्तः॥अन्ववसर्गसूत्रलक्षितस्वरो अनुदात्तउच्यते।यथा अवदतां।यासंज्ञायाःप्रयोजनंअनुदात्तो न
नित्यमिति॥समाहारःस्वरितः॥तयोरुदात्तानुदात्तयोर्यःसमाहारःस्वरितइत्युच्यते।यथा·तेब्रुवन्।समाह्रियत
इतिसमाहारः।तयोर्मेलनजन्यस्वरइत्यर्थःस्वरितस्यविधिरयंउपरिष्टात्तुतत्रतत्रस्वरितोवक्ष्यते।यथाउदात्ता
त्परोनुदात्तस्वरितंउदात्तयोश्चपरोनुदात्तस्वरितं· अस्मिन्ननुदात्तेपूर्वेउदात्तस्वरितमित्यादि॥तस्यादिरुच्चै
स्तरामुदात्तादनंतरेयावदर्धंह्रस्वस्य।उदात्तादनंतरेयःस्वरःस्वर्यतेतस्यादिस्तावदुच्चैस्तरां।उदात्ततरोया
वत् भवतिह्रस्वस्यार्धं।यथा।सइधानः॥उदात्तसमःशेषः॥ह्रस्वार्द्धकालाच्छेषउदात्तसमोभवतिनतूदात्त
एवसमशब्दप्रयोगात्किंचिन्न्यूनत्वंप्रतीयतेस्वरितभावात्पूर्वोक्तमेवउदाहरणं॥सव्यंजनोपि॥केवलस्यायं
न विधिःपुरस्तादुक्तःइदानींव्यंजनसहितत्वेपिस्वरितस्यतथात्वमुच्यते।व्यंजनोपिस्वरितउदात्तादनंतरोन्ये। स्य
वाउक्तविधिर्भवति·अपिशब्दःस्वरितमाकर्षति·यथा·सखिष्यावरिवः॥तिष्यः॥अनंतरोवानीचैस्तरां॥अ
स्यस्वरितस्यह्रस्वार्धकालाच्छेषःनीचैस्तरामनुदात्ततरोवाभवतिअनंतरःशेषइत्यर्थःतदेवउदाहरणं॥

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

त्रि॰ष्य॰ अनुदात्तसमो वा॥ तस्य स्वरितस्य स एव शेषः अनुदात्तसमो वा भवति तदेवोदाहरणं॥ आदिरस्योदात्तसमः
॥७॥ शेषोऽनुदात्तसम इत्याचार्याः॥ अस्यैव स्वरितस्यादि ह्रस्वार्धकाल उदात्तसमो भवति शेषस्त्वनुदात्तसम इ
(८) त्याचार्या ब्रुवते। यथा सखिभ्यो वरिवः। तस्यादिरित्यारभ्याभिहिते तस्मिन्विकल्पजाले सूत्रमेतदेवेष्टं। प्र
श्लिष्टप्रातिहतयोर्मृदुत्तरस्तैरोव्यंजनपादवृत्तयोरित्रिलक्षणानुकूल्यान्नतत्परितनमपि सूत्रमिष्टं ए
तल्लक्षणप्रातिकूल्यादेव। सर्वः प्रवण इत्येके। प्रवणशब्दः स्वरितपर्यायः सव्यंजन एव स्वरित आदित
आरभ्य सर्वः प्रवणो भवतीत्येके आचार्या ऊचिरे। सखिभ्यो वरिवः॥ नानापदवदीङ्ग्यमसंख्याने॥ ईङ्ग्यम
पदं च नानापदवद्भवति असंख्याने विषये। नानापदवदिति किं। ओषतात्तिग्महेते। तत्स्यवात इत्यादावाका
रपूर्वस्य बहुस्वरस्य नेपे इति प्रग्रहत्वं मा भूदिति। असंख्यान इति किं। द्वे परश्चे। एकव्यंवेत्तोपीति द्वे सव ॥७॥
नेष्टुक्रवती इत्यत्र प्रग्रहत्वं भवतीति वदामः। नानापदमिव नानापदवत्॥ तस्य पूर्वपदमवग्रहः॥ तस्येङ्ग्य
पदस्य पूर्वपदमवग्रह इत्युच्यते। दिवायत इति देवयते। अवग्रहसंज्ञायाः प्रयोजनं। नावग्रह इति॥

Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(8A)

पदावग्रहशब्दयोर्नियतलिंगत्वादन्योन्यान्वयः संभवति॥ पदग्रहणेषु पदं गम्येत॥ पदग्रहणेषु सूत्रेषु गृहीतं पदमे
वगम्येत ज्ञातव्यं न पदैकदेशः। यथा त्वेइत्यनीङ्खांत इति वक्ष्यति त्वेक्रतुमिति प्रग्रहो भवति क्रत्वे दक्षाये ति पदैकदेश
त्वान्न भवति ग्रहंतीति ग्रहणानि पदानां ग्रहणानि पदग्रहणानि तेषु॥ अपि विकृतं॥ अपि शब्दः पदमन्वादिशति पद
ग्रहणेषु विकृतमपि पदमवगंतव्यं। यथा णत्वापन्नोवा हन इति ग्रहीष्यते पदमिति विकृत्वा विसर्जनीये ओत्वमापन्ने
पि णत्वं नैव निवर्तते। प्रवाहणो वह्निः। एष सस्य इति विसर्जनीयलोपग्रहणं पठिष्यते। अयमुष्य प्रदेवयुरित्यत्र सका
रेषत्वमापन्नेपि विसर्गलोपो भवत्येव॥ अप्यकारादि॥ अपि शब्दः पदान्वादेशकः पदग्रहणेष्वप्यकाराद्यपि पदं वि
ज्ञेयं। श्वत्रीद्युनेति ह्रस्वादेशो वक्ष्यति। अकारादेरपि तस्य श्वाग्रहणस्य ह्रस्वत्वं संभवति। यथा अश्वावंतं सहस्रि
णं। अकार आदिर्यस्य तत्तथोक्तं॥ अन्कारादिच॥ नकारपदमिति बोधयति पदग्रहणेष्वप्यन्काराद्यपि पदं विज्ञेयं।
अं॥ श्वित्यनुस्वारागमं वक्ष्यति। अन्कारादेरपि तस्यानुस्वारागमस्यात्। यथा। अनंशुं कुर्वतः। अन्कारादिर्य
स्य तत्तथोक्तं॥ अन्यत्र सूत्रे अनित्यस्य कारोत्तरत्वं कथं क्रियते वर्णः कारोत्तरो वर्णाख्ये ति वर्णमात्रस्य कारोत्तरत्व

विधानभंगप्रसंगात्॥ उच्यते। सत्यमेतच्छास्त्राबलान्न क्रियते किंतु शास्त्रांतरबलात् क्रियते। यथा पाणिनीया एवकारः अ
॥८॥ पिकार इत्यादीनां साधुतां कथयंति एवमत्रापि एवमः कार आगमेत्यत्रापि दोषपरिहारो विज्ञेयो। एकवर्णः पदमपृ
क्तः॥ एकश्चासौ वर्णश्चैकवर्णः स चेत्सदं भवति सोपृक्तसंज्ञः। यथा सउ वेक विं शावर्तेनिः। पदमिति किं। यज्ञपता श उ
(१) इति संज्ञायाः प्रयोजनं। उकारोपृक्तः प्रगृह्येति। अपृक्त इति व्यंजनेनासंयुत इत्यर्थः॥ आद्यंतवच्च॥ एकारान्वादि
र्वतदपृक्तसंज्ञं पदं आदिवदंतवच्च कार्यभाग्भवति। आदिवद्यथा। सउ वेक विं शवर्तेनिरित्यत्र तस्यादि रु वे स्तरा
मिति कार्यं भवति। अंतवद्यथा। ओतेयंतीत्यत्र अंत इति प्रग्रह कार्यं भवति। आदिश्च अंतश्च आद्यंतौ ताविव आद्यं
तवत्॥ वर्णस्य विकारलोपौ॥ वर्णमात्रस्य विकारलोपौ स्यातां न तु सर्वस्य पदस्य। विकारस्तावत् धर्षा हा विति।
लोपस्तु सते जानाति॥ विनाशो लोपः॥ वर्णविनाशो लोपसंज्ञो भवति। यथा। ईमंद्रा सुप्रयसः। संज्ञायाः प्र ॥८॥
योजनं। अपलोप इत्यादि। वर्णस्य नित्यतां केचिदाहुः तन्निराकरणाय व्याकरणानुसारेण सूत्रमेतत्॥ अभ्याणि।
अन्वादेशोंत्यस्य॥ निमित्तस्य निमित्तिनो वांत्यस्यान्वादेशो भवति निमित्तीति प्रथमकार्यभागिति यावत् सन्निमि
त्तस्य। यथा। हन्या दुष्यमानं चेत्यस्य निङ्हाद स्या। निमित्तिनो यथा। अकारस्तु संहितापामपीत्यत्र सुश्लोकां इत्यस्य।

(9A)

अंत्यस्येतिकिं। ब्रह्मा३ंस्त्वं३ राजन्। अग्ना३इत्याह। विचित्यः सोमा३ नविचित्या३ इति॥ उपबंधस्तद्देशापनित्यं॥
उपबंधस्तत्स्वदेशापैव नित्यं निर्देशको भवति। उपबध्यते इत्युपबंधः। एतस्मिन्नित्यधिकरणरूपः संख्याविष
यः प्रदेशश्च उपबंध उच्यते। यथा। इरावती प्रभृत्यादिसूत्रद्वयं। सोमायस्यैतस्मिन्। गमयतो भवत इति च। उप
बंधे यदुक्तं तदन्यत्र न भवतीति तु शब्दार्थः। यथा। इत्याह देवी घोषादेवः सोमः। अत्र त्रिपभ्रभृतिन्यायेन पूर्वजेप ८
भृत्यायुमितिप्राप्तिः। अन्यत्र यो निषेधः स उपबंधेन भवतीति नित्यशब्दार्थः। यथा सदोहविर्धान इति प्रग्रहो
ग्रहिष्यते केवल हविर्धान इति सर्वदा न प्रग्रहो गृह्यते। यथाह विर्धने खायेत इत्यपमन्यत्र निषेधः। हविर्धाने प्राप्तौ
प्रवर्तयेयुरित्यत्र न प्रसरति गमयतो भवत इत्यादिनाप्राप्तिः। नन्वेतदनुपपन्नं अन्यत्र निषेधस्यैव विदुपबंधे
पिदर्शानात्। यथा। अथ मिथुनी भवत इति गमयतो भवत इत्युपबंधप्राप्तिः। नयामीत्यादिनान्यत्र निषेधेन नि
षिध्यते। यथा। वायव आरोहणवाहा वित्यत्र सोमायस्यैतस्मिन्निति प्राप्तिः। अते समानेदि नित्यमित्यनेन अन्य प
त्र निषेधेन निषिध्यते। अग्रो च्यते। ग्रामीवायवेमनवेइत्यादीनां कंठोक्तत्वाद् एष निषेधः प्रसरतु। केवलहविर्धाने प्र

त्रि·व्य·

यहो नेत्यायमार्थिको निषेधो न प्रसरत्येव। आर्थिककंठोक्तयोः कंठोक्तस्य प्राबल्यात्। नन्वते अवेत्यनयोः कंठोक्तेवालं
॥९॥ तत्र नित्यग्रहणेन किं। उच्यते। नितरां परिहारः कंठोक्तिरूपवंधप्राप्तिमेव निर्वर्तयति। नित्यशब्दस्तु आस्यंतरमपिप
रिहरति। यथा। हे जाये विंदत इत्यत्र एकव्यवेतोपी ति प्राप्तिः। वनस्पते वीडुंगर इत्य वीडादिप्राप्तिः। एवमाद्यूहनीयं। माहि
(10) षेयमतानुसारेणैवं प्रपंचितं॥ नानापदीयं च निमित्तं प्रग्रहस्यादिषु॥ चकारस्तु शब्दनिगदितमर्थमन्वादिशति। प्रग्र
हेष्ठुस्यादिषु च नानापदसंबंधनिमित्तं असंहितायामपि स्वकार्यमुपदिशतीति प्रग्रहो नुस्वारकार्यं न निवर्तते।
यथा। घ्नी चक्राय परिस्म ग्रहैौ भवत इत्यत्र प्रग्रहत्वेपकारोपादिष्टे पदकालेपि नत्वमेव। स्यादिषु च यथा नाव ग्रह पूर्व इत्य
वग्रहेणानुस्वारागमे निषिद्धे पदकालेपि तथैव। यथा। अर्धमासे देवाः षत्वणत्वादौ तु नानापदीयं निमित्तं असं
हितायामेव कार्यं करोतीत्ययमारंभः। यथा स्तुचिषादिति स्तुचिः सत्। प्रवाहणा इति प्र·वाहनः। यथोक्तं पुनरुक्तं त्रि ॥९॥
पदप्रभृति त्रिपदप्रभृति॥ यथोक्तं पुनरुक्तं त्रिपदप्रभृति त्रयाणां पदानां समाहारस्त्रिपदं कार्यभाजः पदस्य तती
यत्वं विज्ञेयं। ईदृशं त्रिपदं प्रभृतिः आदिर्यस्य न त्रिपदप्रभृति। यथोक्तं पूर्वोक्तं विधिं करोति स्वरविशेषणात्त त्रिप

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(10A)

दप्रश्लतिपुनरुक्तंचेत्।तथाहि॰लुप्यतेत्वकारएकारपूर्वइत्यनेनप्रथमकांडेतृतीयप्रश्नेदेवस्यत्वासवितुःप्रसवेऽश्विनो
रित्यत्रअकारेलुप्तेतदेववाक्यंवाजपेयेअल्लोपंबाधित्वातथैवभवतित्रिपदप्रभृतित्वात्॰उभावामित्यत्रसुपथाराये
अस्मानित्येतदुदुत्यंजातवेदसमित्यत्रापितथैव।तथासंतेवायुरित्यत्रसजातोगर्भोअसिरोदस्योरित्येतत्क्रूरमिव
वाइत्यत्रापितथैव।ब्राह्मणवाक्येषुतुत्रिपदमात्राद्धाकार्यंभवति।ब्राह्मणवाक्येषुपूर्वस्यलस्यैवोक्तेः।इमामगृभ्ण
न्नित्यत्रमर्यश्रीस्पृहयद्वर्णोअग्निरित्येनद्वाकांडेमुक्तामित्यत्रब्राह्मणेपितथैवभवति।कार्यभाजःपदस्यतृती
यत्वमितिकिं।येअंतरिक्षेयेदिविनेभ्यःइत्यत्रयेंतरिक्षेये।दिवियेषामितिरूढोत्तमानुवाके॰प्राप्तेतीतिकिं।त्वम
ग्नेरुद्रइतियाज्यायांदिवस्परिप्रथमंजज्ञेअग्निरितिवाक्यमग्नयेन्नवतेइत्यत्र।इतःप्रथमंजज्ञेअग्निरिति
सत्त्वथैवाभूदितिचेन्नैवं।त्रिपदमात्रादेवतथाभावइतिनात्रवक्ष्यमयुक्तं।किंतुजज्ञेसंःस्फानइतिजज्ञेग्रहणासा
धर्म्यात्।अन्यथातस्यवैयर्थ्यात्।पदवीप्साध्यायपरिसमाप्तिंद्योतयति॥ ॥इतिप्रातिशाख्यविवरणेत्रिभा
ष्यरत्नेप्रथमोऽध्यायः॥ ॥अथशब्दोत्पत्तिः॥उक्तोवर्णसमाम्नायस्तेषांवर्णानांकीदृशंकरणंकथंवातदुपल
ब्धिरित्याकांक्षानंतरंतन्निरूप्यतइत्यानंतर्यार्थोथशब्दः।अथवाइतउत्तरंयद्वक्ष्यतेतच्छब्दोत्पत्तिरितिएत

## मूळ प्रत पाहण्यासाठी संपर्क

---

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**

राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)

**दूरध्वनी क्रमांक** (०२५६२) २३३८४८

**Email ID** : rajwademandaldhule@gmail.com